UGC Journal No. : 41784

ISSN: 2349-5928

# HUMANITIES AND SOCIAL SCIENCE REVIEW

*(An International Peer Reviewed Refereed Journal)*

**Editor in Chief**

*Professor Vinay Kumar Pandey*

*Department of Jyotish, Faculty of S.V.D.V.*

Banaras Hindu University,

(351)

# Humanities and Social Science Review

*Vol. 5 No. 2* *ISSN 2349-5928* *July–December 2018*

## CONTENTS


| Sl. No. | Title | Name | Page No. |
|---|---|---|---|
| 1. | संस्कृत वाङ्मय में सहयोग का माहात्म्य | डॉ0 सूर्यकान्त झा | 1-8 |
| 2. | La langue maternelle (Hindi) et la langue source (English) en classe de la française langue étrangère | Aakash Dwivedi | 9-14 |
| 3. | Human Rights and Women in India | Dr. Satyanandan Bhagat | 15-20 |
| 4. | वैदिक साहित्य में स्वाध्याय एवं प्रवचन का माहात्म्य | डॉ0 दीप लता | 21-31 |
| 5. | वैदिक देवताओं का उद्भव एवं विकास | डॉ. कुमकुम पाठक | 32-45 |
| 6. | प्रजनन व्यवहार के संदर्भ में चयनित शोध कार्यों की एक समीक्षा | आरती सिंह एवं सुमन सिंह | 46-61 |
| 7. | रुपकत्रय के परिप्रेक्ष्य में महाकवि कालिदास का वेदानुप्राणित चिन्तन | शशिकान्त मिश्र | 62-64 |
| 8. | समकालीन पर्यावरणीय चिन्तन और आदिवासी समाज | मनोज कुमार | 65-72 |
| 9. | लोक के सन्दर्भ में भारतेन्दु की "कविताएँ" | नैन्सी गुप्ता | 73-79 |
| 10. | संस्कृतपत्रिकासु सम्भाषणसन्देशस्य आलोचनम् | आचार्य डॉ० बृहस्पति मिश्रः | 80-85 |
| 11. | श्रीमद्भागवतान्तर्गत वेदवाणी द्वारा भगवत्स्तुति | डॉ0 मनोज कुमार | 86-99 |
| 12. | योगांगस्वाध्याय के सन्दर्भ में मनुस्मृति की अवधारणा | डॉ0 रवि कुमार (शास्त्री) | 100-107 |
| 13. | भारतीय संस्कृति में स्मृतियों का महत्त्व | सुशील कुमार | 108-112 |
| 14. | अनेकान्तवाद एवं पर्यावरण संरक्षण | डॉ0 शिल्पी गुप्ता | 113-118 |

Humanities and Social Science Review, July-December 2018, Vol-05, No.-02

# संस्कृतपत्रिकासु सम्भाषणसन्देशस्य आलोचनम्

आचार्य डॉ० बृहस्पति मिश्रः*

समाजस्य मार्गदर्शकाः विद्वांसः भवन्ति। विद्वद्दर्शिताः श्रुति -स्मृति-प्रतिपादिताः व्यवहाराः समाजस्य उन्नतिहेतवः । विदुषां विचाराः आधुनिके समाजे पुस्तकेषु सङ्कलिताः भवन्ति। किन्तु तान् पठितुं जनाः उत्साहिताः न भवन्ति । अत एव तथाविधस्य पुस्तकस्य प्रकाशनम् आरब्धं यस्मिन् बहूनां विदुषां विचाराणां सङ्कलनं भवेत् , यस्य च प्रकाशनं निश्चिते समये प्रतिपर्यायं भवेत् । एतच्च पुस्तकाकारं पत्रमिव पत्रालयद्वारा गृहं गृहं जनं जनं प्रति निर्दिष्टे सङ्केते गच्छेत् ।

अतः तत् पत्र-तुल्यत्वात् 'पत्रम्' अथवा 'पत्रिका' इति नामधेयेन विख्यातम् अभूत्।[1] यथा अन्यासां भाषाणां पत्रिकाः सन्ति । तथैव संस्कृतभाषायाः अपि बह्व्यः पत्रिकाः सन्ति। **'गाण्डीवम्'**[2] इति साप्ताहिकपत्रिकायाः अनुसारं सर्वप्रथमं संस्कृतपत्रिका १८६६ तमे वर्षे 'काशी-विद्या-सुधानिधिः' इति नामिका आसीत् । डा० रामगोपाल-मिश्रवर्यस्य मतानुसारं १९तमे शताब्दे ५४ पत्रिकाः तथा २० तमे शताब्दे १६६पत्रिकाः प्रचलिताः अभूवन् । प्रारम्भे पत्रिकाणाम् उपयोगः विशेषतया नूतनसाहित्यस्य लोकार्पणाय प्रसाराय च क्रियते स्म[3]।

अस्मिन् समये शताधिकाः संस्कृतपत्रिकाः प्रकाशिताः भवन्ति तासु च दिनपत्रिकाः साप्ताहिक-पत्रिकाः, पाक्षिकपत्रिकाः, मासिकपत्रिकाः, द्वैमासिकपत्रिकाः, त्रैमासिकपत्रिकाः, चातुर्मासिकपत्रिकाः, षाण्मासिकपत्रिकाः, वार्षिक-पत्रिकाः च भवन्ति । भारतं विचित्रं राष्ट्रम् अस्ति । अत्र संस्कृतस्य साहित्यम् , व्याकरणम्, वैदिकम्, संस्कृत्यादिकञ्च आश्रित्य बह्व्यः शोधसंस्थाः कार्यं कुर्वन्ति ।

कासाञ्चित् संस्थानां संस्कृतवाङ्मयम् आधारीकृत्य पत्रिकाः प्रकाशिताः अपि भवन्ति किन्तु ताः आङ्ग्लभाषायां प्रकाशिताः भवन्ति इति वैचित्र्यम् । काश्चन तथाविधाः

---

* प्राध्यापकः, श्रीशक्तिसंस्कृतमहाविद्यालयः, श्रीनयनादेवी जी,बिलासपुर,हि.प्र.

[1]संस्कृतानुवाङ्मयम् ,श्रीहरिकृष्णशास्त्रिदातारः, चौखम्बा विद्याभवन, वाराणसी,सन् 1993, पृ. 91-93

[2]'गाण्डीवम्'(संस्कृत-प्रगति-विशेषाङ्कः) वाराणसी,सन् १९८१,पृ. 86

[3]संस्कृत के गौरव शिखर, श्रीकलानाथशास्त्री, राष्ट्रिय संस्कृत संस्थान, नवदेहली,सन् 1998,पृ. 110